KVM Research Journal
Multidisciplinary Peer Reviewed, Journal
ISSN : 2976-1301

# ध्वनितत्त्वचिन्तनम्

**उत्तम प्रसाद खतिवडाः**
सह-प्राध्यापक
नेपाल संस्कृति विश्वविद्यालय
up.sharma977@gmail.com

## १. विषयपरिचयः

'ध्वन शब्दे' इत्यस्माद्धातोः कर्तृकर्मकरणार्थेष्वधिकरणार्थे इ-प्रत्ययेन ध्वनिशब्दो निष्पद्यते । ध्वनिशब्दः संस्कृतवाङ्मयेऽतिप्राचीनकालादेव व्यवहृतोऽस्तीत्यवगम्यते । सर्वप्रथममथर्ववेदे लोकप्रचलितार्थ एव ध्वनिशब्दः प्रयुक्तोऽस्ति– अन्तरे मे नभसी घोषो अस्तु पृथक्ते ध्वनयो यन्तु शीभम् । इति । एवं महाभाष्यकारेण पतञ्जलिनापि प्रतीतपदार्थकध्वनेः शब्दत्वं व्यवस्थाप्य तपर-सूत्रस्य भाष्ये स्फोटाविभेक्तेरनन्तरं समुत्पन्नो वैकृतध्वनिर्ध्वनित्वेन अमन्यत । तथैव वाक्यपदीयकारः भर्तृहरिरपि इत्थं ध्वनिं लक्षयति–यः संयोगवियोगाभ्यां करणैरुपजन्यते । स स्फोटः शब्दजः शब्दो ध्वनिरित्युच्यते बुधैः ॥ स्फोटस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते । स्थितिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते ॥ शब्दस्योद्धर्वमभिव्यक्तेवृत्तिभेदे तु वैकृताः । ध्वनयः समुपोहन्ते स्फोटात्मा तैर्नभिद्यते ॥ (भर्तृहरिः, सन् १९९०, पृ. ३०) इति । वैयाकरणैरर्थप्रकाशकः स्फोट एव व्यङ्गचत्वेन स्वीकृतः, तस्य स्फोटस्यापि यो व्यञ्जको भवति स एव ध्वनिरिति तेषामभिमतम् । आलङ्कारिकैर्ध्वनिशब्दोऽयं पञ्चस्वर्थेषु प्रयुक्तो दृश्यते । क) ध्वनतीति ध्वनिः ख) ध्वन्यते इति ध्वनिः ग) ध्वननं ध्वनिः । इत्याभिस्त्रिसृभिर्व्युत्पत्तिभिः पञ्चार्थाः संगृहीता भवन्ति । प्रथमव्युत्पत्तिद्वारा वाच्यार्थस्य वाचकशब्दस्य च ध्वनिशब्देन बोधो भवति । द्वितीयव्युत्पत्या केवलं व्यङ्गचरूपोऽर्थ एव ध्वनिशब्देन प्रतीयते तथा तृतीयव्युत्पत्या च व्यञ्जनारूपव्यापारो ध्वनिशब्दगम्यो भवति । ध्वनेः पञ्चमो विषयश्च समुदायरूपं काव्यमेव । यतो हि चतुर्णामेवार्थानां तत्र समाहितो भवति । अतः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः (आनन्दवर्धनः, सन् २०१०, पृ. १५) । अत्र च समुदायरूपकाव्यार्थ एव ध्वनिशब्दो व्यवहृतः । अभिनवगुप्तेनापि उक्तम् - अर्थो वा शब्दो वा व्यापारो वा अर्थोऽपि वाच्यो वा ध्वनतीति शब्दोऽप्येवम् । व्यङ्गचो वा ध्वन्यत इति । व्यापारो वा शब्दार्थयो र्ध्वननमिति । कारिकया तु प्राधान्येन समुदाय एव काव्यरूपो मुख्यतया ध्वनिरिति प्रतिपादितम् (आनन्दवर्धनः, सन् २०१०, पृ.१७ ) । एवञ्च तेन वाच्योऽपि ध्वनि वाचकोऽपि शब्दो ध्वनिः । द्वयोरपि व्यञ्जकत्वं ध्वनतीति कृत्वा । सम्मिश्रचते विभावानुभावसंवलनयेति व्यङ्गचोऽपि ध्वनिः, ध्वन्यत इति कृत्वा । शब्दनं शब्दः शब्दव्यापारः, न चासावविधादिरूपः अपित्वात्मभूतः, सोऽपि ध्वननं ध्वनिः काव्यमिति व्यपदेशश्च योऽर्थः सोऽपि ध्वनिः । उक्तप्रकार ध्वनिचतुष्टयमयत्वात् । तथा च पञ्चधापि ध्वनिशब्दार्थे येन, यत्र, यतः, यस्य, यस्मै इति बहुव्रीह्यार्थाश्रयेण यथोचितं सामानाधिरण्यं सुयोज्यम् । अत्र उक्तप्रकार इति पञ्चस्वर्थेसु योज्यम् –शब्दे, अर्थे, व्यापारे,

व्यङ्ग्ये, समुदाये च । इत्यनया रीत्या पञ्चस्वर्थेषु प्रयुक्तो ध्वनिः, आनन्दवर्धनाचार्येण काव्यात्मत्वेन ध्वन्यालोकग्रन्थे प्रतिष्ठापितः । तल्लक्षणञ्च– यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ । व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः (आनन्दवर्धनः, सन् २०१०, पृ. २०) ॥ इति । अनेन प्रकारेण ध्वनिलक्षणं प्रस्तुत्य काव्ये ध्वनेरत्यावश्यकत्वं च प्रतिपादितम् । ध्वन्यालोककारेण ध्वनिविर ोधिमतान्यप्युपस्थाप्य तत्परिहारश्च विहितः विद्यते ।

## २. ध्वनितत्त्वप्रतिपादनम्

ध्वनिसंप्रदायः संस्कृतसाहित्ये महत्त्वपूर्णसम्प्रदायतया विराजते । अस्य संप्रदायस्य संस्थापक आचार्य आनन्दवर्धनो ध्वन्यालोकस्यारम्भे ध्वनेः काव्यात्मत्वं व्यवस्थापयन् तस्य प्राचीनकालादेव अविच्छिन्नरूपेण प्रतिपादितत्वं संकेतयति (आनन्दवर्धनः, सन् २०१०, पृ. १) । यद्यपि ध्वनिसंप्र दायस्य स्थापनमानन्दवर्धनेन कृतम्, परमेतावता तत्पूर्वं ध्वनेरस्तित्वं न स्वीकृतमिति न । अतः अयमाचायो ऽपि 'समाप्नातपूर्वः' इति शब्देन तत्सूचयति । पूर्वमलङ्कारग्रन्थेषु ध्वनेरुल्लेखो न विद्यते तथापि विद्वत्परम्परायां सश्रद्धं ध्वनेश्चर्चा समागतास्तीत्यविस्मरणीयो विषयः । अतः अभिनवगुप्तोऽपि तदेवाभिव्यनक्ति – न च बुधा भूयांसोऽनादरणीयं वस्तु आदरेणोपदिशेयुः । एतत्तु आदरेणोपदिष्टम् । आचार्य आनन्दवर्धनः प्राचीनाचार्यैर्भर तादिभिरपि रसादितात्पर्येण ध्वन्यमानार्थस्य प्रतिपादनं विहितमिति विश्वसिति । तथा च अस्फुटरूपेण प्र तीयमानं ध्वनिरूपकाव्यतत्त्वं व्याख्यातुमसमर्था वामनादयः रीतीनां चर्चायां रता इति तान् आक्षिपति अपि । एवञ्च काव्येषु अलङ्काराणामेवाङ्गीत्वं स्वीकुर्वाणैर्भामहादिभिराचार्यैरपि ध्वन्यमानार्थस्यापलापेऽसमर्थैः सद्भिः पर्यायोक्ताप्रस्तुतप्रशंसाद्यलङ्कारेषु ध्वनेरन्तर्भावो विहितः । तथा च रसाद्यर्थानां रसवत्प्रेयऊर्जस्वि-आद्यलङ्कारेषु अन्तर्भावोऽभिप्रेतः । तच्चालङ्कारसर्वस्वकारेणैकावलीकारेण च स्वकीये ग्रन्थे यथायथं प्रदर्शितम् । परं ध्वन्यमानार्थस्य अलङ्कारेष्वन्तर्भावो न कथमपि संगच्छत इति वास्तविकः पक्षः । अतः ध्वन्यार्थस्य स्वतन्त्रत्वं सर्वैरभ्युपेयम् । किं बहुना वाल्मीकिव्यासकालिदासादिभिर्महाकविभिरपि स्वीयरचनायां काव्यात्मभूतस्यातिरमणीयध्वन्यर्थस्य विधानं यत्रतत्र विहितमिति किं कथनीयम् । महाकविर्वाल्मीकिः पञ्चवट्यां हेमन्तं वर्णयन्नाह – रविसंक्रान्तसौभाग्यतुषारवृत्तमण्डलः । निःश्वासान्ध इवादर्शश्चन्द्रमा न प्र काशते ॥ (वाल्मीकिः, सन् १९९०, पृ. १२०) इति ।

अत्र लक्षणलक्षणया वाच्यार्थभिन्नः प्रतीयमानोऽर्थो ध्वनितोऽस्ति । श्लोकोऽयमत्यन्ततिरस्कृतवाच्यध्वनेरुदाहर णमस्ति । महर्षिव्यासोऽपि कलियुगस्य प्राकट्यं प्राबल्यञ्च इत्थं प्रदर्शयति – अतिक्रान्तसुखाः कालाः प्र त्युपस्थितदारुणाः । श्वः श्वः पापीयदिवसा पृथिवी गतयौवना (वेदव्यासः, सन् २०१०, पृ. ३२०) ॥ इति । अत्र च शान्तरसोऽभिव्यञ्जितस्तथाविवक्षितवाच्यध्वनिः प्रकाशितोऽस्ति । तथा च महाकविः कालिदासोऽपि विक्रमोर्वसीये पुरुरवसो मुखात्प्रकटयति–अयमेकपदेतया वियोगः प्रियया चोपनः सुदुःसहो मे । नववारिधर ोदयादहोभिर्भवितव्यं च निरातपत्वरम्यैः ॥ इति । अत्र च प्रियावियोगेन सह काकतालीयन्यायेन वर्षासमयप्र ाप्तेर्वर्णनात् प्राणहरणाय अलमिति ध्वनितम् । तथैव अभिज्ञानशाकुन्तले च –मुहुरङ्गुलिसंभृताधरोष्ठं

कथमप्युन्नमितं न चुम्बितं तु । इत्यस्मिन् प्रसिद्धश्लोकांशे तु निपातेन पश्चात्तापः अभिव्यञ्जितः तथा चुम्बनमात्रेण च कृतकृत्यतायाः सूचनात् शृङ्गाररसो ध्वनितोऽस्ति । एवञ्च – कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायाम् । किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥ इत्यादौ कालिदासीयपद्येऽपि सन्नद्धमधुरपदे मुख्यार्थं विहाय क्रमशः उद्यतत्वसुन्दरार्थौ अभिव्यङ्क्तः । तथा च – या निशा सर्वभूतानां तस्यां जागर्ति सं यमी । यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः (वेदव्यासः, २०७५, पृ.२०) ॥ इति । इत्यस्मिन् पद्ये च जागर्ति, जाग्रति निशा इत्यादिपदानां मुख्यार्थः न विवक्षितः । अपितु संयमिनां तत्त्वज्ञाननिष्ठता अतत्त्वपर ाङ्मुखता च प्रकाशितास्तीति अविवक्षितवाच्ये अत्यन्ततिरस्कृतवाच्यध्वनेरुदाहरणमिदम् । तथा महाभारतस्य गृद्धगोमायुरूपसंवादरूपः प्रबन्धः ध्वनेः प्रसिद्धमुदाहरणमस्ति । पण्डितराजजगन्नाथेनापि ध्वनिविषये समर्थयता उक्तम्– इदं तु बोध्यं ध्वनिकारात्प्राचीनंभामहोद्भटप्रभृतिभिः स्वग्रन्थेषु कुत्रापि ध्वनिगुणीभूतव्यङ्ग्यादिशब्दा न प्रयुक्ता इत्येतावतैव तैर्ध्वन्यादयो न स्वीक्रियन्ते इत्याधुनिकानां वाचोयुक्तिरयुक्तैव । यतः समासोक्तिव्याजस्तुत्यप्रस्तुतप्रशंसालंकारनिरूपणेन कीयन्तोऽपि गुणीभूतव्यङ्ग्यभेदास्तैरपि निरुपिता अपलापश्च सर्वोऽपि व्यङ्ग्यप्रपञ्चः पर्यायोक्तकुक्षौ निक्षिप्त इति । सर्वानुभवसिद्धार्थानामपलापः बालैरपि कर्तुर पार्यते । ध्वन्यादिशब्दस्तै न व्यवहृत इत्येतावता ध्वनेरस्वीकार इति न बोध्यम् । उक्तञ्च – न हि अनुभवसिद्धोऽर्थो बालेनाप्यपलपितुं शक्यते । ध्वन्यादिशब्दैः परं व्यवहारो न कृतः । न हि एतावतानङ्गीकारो भवति प्राधान्यादलङ्कार्यो हि ध्वनिरलङ्कारस्य पर्यायोक्तस्य कुक्षौ कथंकारं निविशताम् ? इति तु विचारान्तरम् । एतावता प्राचीनकालादेव ध्वनेरवच्छिन्नपरम्परा समागतास्तीति सर्वजनमतिविषयीभूता । परं ध्वनितत्त्वस्य व्याख्यानमेव आनन्दवर्धनेन विधाय ध्वनिसंप्रदायः प्रचालितः । एतदर्थमाचार्योऽयं समेषां स्मरणीयः । ध्वन्यालोकस्य अन्ते तेन स्वयमेव उक्तम् – नित्याक्लिष्टरसाश्रयोचितगुणालङ्कारशोभादृतो यस्माद्वस्तुसमीहितं सुकृतिभिः सर्वं समासाद्यते । काव्याख्येऽखिलसौख्यधाम्नि विबुधोद्याने ध्वनिर्दर्शितः सोऽयं कल्पतरूपमानमहिमा भोग्योऽस्तु भव्यात्मनाम् (आनन्दवर्धनः, सन् २०१०, पृ. १८०) ॥ इति । स च ध्वनिः कुत्रचिद्रसादिरूपेण कुत्रचिद्वस्तुरूपेण कुत्रचिच्चालङ्काररूपेण भासते प्रतीयमानः त्रिविधोऽपि व्यङ्ग्यार्थः वाच्यार्थान्नितरां भिन्नो भवति । अतः वाच्यार्थध्वन्यार्थयोरैक्यं सर्वथासङ्गतम् । प्रसङ्गेऽस्मिन् कानिचिदुदाहरणानि प्रदर्श्यन्ते –

क) भ्रम धार्मिक विश्वस्त स शुनकोऽद्य मारितस्तेन ।

गोदानदीकच्छकुञ्जवासिना दृप्तसिंहेन (आनन्दवर्धनः, सन् २०१०, पृ. १५) ॥ अस्मिन् पद्ये वाच्यार्थः विधिरूपोऽस्ति परं ध्वन्यार्थः निषेधरूपो विद्यते ।

ख) श्वश्रूरत्र निमज्जति अत्राहं दिवसकं प्रलोकय ।

महापथिक रात्र्यन्धः शय्यायामावयोर्मङ्क्ष्यसि ॥ अत्र च वाच्यार्थः निषेधरूपः विद्यते परं ध्वन्यार्थः विधिरूपेण प्रतीयते ।

ग) बहलतना हतरात्रिरद्यप्रोषितपतिर्गृहं शून्यम् ।

तथा जागृहि प्रतिवेशिन् न यथा वयं मुष्यामहे ॥ इत्यत्र च विधिरूपवाच्यार्थाद्विध्यन्तररूपोऽर्थः प्र

तीयते । अनेनैव प्रकारेण आस्वादितमज्ञातेन इत्यादिपद्ये च निषेधरूपवाच्यार्थान्निषेधान्तररूपोऽर्थः प्रकाशितो भवति । तथा च मधुकैः किमिव पान्थ इत्यादिपद्ये च विधिनिषेधाभावरूपवाच्यार्थाद्विधिरभिव्यज्यते । जीविताशा बलवती इत्यत्र विधिनिषेधाभावरूपवाच्यार्थान्निषेधरूपोऽर्थः प्रतीयते । यथा अत्र गच्छ वा तिष्ठ वा इत्यविधिनिषेधात्, जीविताशा बलवती धनाशा दुर्बला ममेति वचनात् त्वया विना अहं जीवितुं न शक्नोमि इत्युपक्षेपेण गमननिषेधः प्रतीयते । इत्यादिभिरुदाहरणैर्ध्वन्यार्थस्य वाच्यार्थात् पार्थक्यं सिद्धम् । ध्वन्यार्थवाच्यार्थयोर्भेदका अनेके भवन्ति । उक्तञ्च –

बोद्धृस्वरूपसंख्यानिमित्तकार्यप्रतीतिकालानाम् ।

आश्रयविषयादीनां भेदाद्भिन्नोऽभिधेयतो व्यङ्ग्यः (विश्वनाथः, २०६७, पृ.३०५) ॥ इति ।

अतः ध्वन्यार्थवाच्यार्थयोरनैक्यं निर्बाधम् । अस्य ध्वनेर्बहवो भेदाः सम्भवन्ति । प्रथमतः द्वावेव मुख्यभेदौ स्तः ।

१) लक्षणामूलध्वनिः/अविवक्षितवाच्यध्वनिर्वा

२) अभिधामूलध्वनिः/विवक्षितान्यपरवाच्यध्वनिर्वा

लक्षणामूलध्वनौ वाच्यार्थो बाधितो भवति । तथा ध्वनिश्च प्रयोजनमूलकलक्षणायामाश्रितो भवति । अस्य च ध्वनेः द्वौ प्रभेदौ स्तः ।

क) अर्थान्तरसंक्रमितवाच्यध्वनिः

ख) अत्यन्ततिरस्कृतवाच्यध्वनिः

एवञ्च अभिधामूलध्वनौ वाच्यार्थस्य बाधो न भवति परं स व्यङ्ग्यतया प्रकाशितो भवति । तस्यापि द्वौ प्रभेदौ स्तः ।

क) असंलक्ष्यक्रमव्यङ्ग्यध्वनिः

ख) संलक्ष्यक्रमव्यङ्ग्यध्वनिः

असंलक्ष्यक्रमव्यङ्ग्यध्वनौ व्यङ्ग्यार्थबोधे सत्यपि क्रमे शतपत्रभेदनन्यायेन क्रमः न प्रतीयते अतः स असंलक्ष्यक्रमः ध्वनिरित्युक्तः । अस्मिन्नेव रसभाव-रसाभास-भावाभास-भावशान्ति-भावोदय-भावसन्धि-भावसबलतादिसमस्तरसप्रपञ्चः समाविष्टो भवति । अस्य च अनन्तभेदा सन्ति । परं संलक्ष्यक्रमव्यङ्ग्यध्वनौ वाच्यार्थव्यङ्ग्यार्थयोर्बोधे पौर्वापर्यस्य क्रमः संलक्षितो भवति । अतः ध्वनिरयं संलक्ष्यक्रमव्यङ्ग्यो जातः । ध्वनिरयं शब्दशक्त्युद्भवार्थशक्त्युद्भवशब्दार्थोभयशक्त्युद्भवभेदात्त्रैविध्यमाप्नोति । तथा वस्तुरूपतया अलङ्काररूपतया च ते ततोऽपि विस्तीर्णा भवन्तीति ध्वनीनां सहस्रशो भेदाः सम्भवन्ति ।

**३) ध्वनिविरोधिमतानि तत्परिहारश्च**

ध्वनितत्त्वं विस्तारयता आनन्दवर्धनेन स्वपूर्ववर्तिभिराचार्यैरेव ध्वनिर्व्यवहृत आसीदिति 'य समाम्नातपूर्वः' इति पदेन प्रकटितम् । तेन ध्वन्यालोकाख्यप्रबन्धे ध्वनिविरोधीनि त्रीणि मतानि स्पष्टतः प्रदर्शितानि । तदतिरिक्तं ध्वनिविषये तद्विरोधीनि बहूनि मतानि अन्यैराचार्यैरपि प्रदर्शितानि । जयरथाख्येनाचार्येण स्वकीयेऽलङ्कारसर्वस्वस्य व्याख्याग्रन्थे कस्यचिद् अनिर्दिष्टग्रन्थकारस्य कारिकाद्वयं उपस्थापितम् । यत्र च

ध्वनिसम्बन्धे द्वादशविप्रतिपत्तयः सन्निर्दिष्टाः सन्ति । यथा–

तात्पर्यशक्तिरविधा लक्षणानुमिती द्विधा ।
अर्थापत्तिः क्वचित्तन्त्रं समासोक्त्याद्यलङ्कृतिः ॥
रसस्य कार्यता भोगो व्यापारान्तरबाधनम् ।
द्वादशेत्थं ध्वनेरस्य स्थिता विप्रतिपत्तयः (अलङ्कारसर्वस्वम्, विमर्शिनी टीका) ॥ इति ।

तेषां विवेचनं संक्षेपेण क्रमशः प्रदर्श्यते –

१) ध्वनिविरोधिप्रथममतं तेषां मीमांसकानामस्ति, ये तात्पर्यशक्तिद्वरैव ध्वन्यार्थस्य बोधो भवतीति स्वीकुर्वन्ति । तथा व्यङ्ग्यार्थस्यापि यावत्कार्यप्रसारित्वमेवमपरिमितार्थबोधकतात्पर्यबोध्यत्वञ्च मन्वते । यथा- तात्पर्यानतिरेकाच्च व्यञ्जकत्वस्य न ध्वनिः । किमुक्तं स्यादश्रुतार्थस्तत्पर्येऽन्योक्तिरुपिणि ॥ एतावत्येव विश्रान्तिस्तात्पर्यस्येति किं कृतम् ? यावत्कार्यप्रसारित्वात्तात्पर्यं न तुलाधृतम् ॥ पौरुषे यस्य वाक्यस्य विवक्षा परतन्त्रता । वक्त्राभिप्रेततात्पर्यमतः काव्यस्य युज्यते (धनञ्जयः, सन् १९९५, पृ. १२५) ॥

२) द्वितीयं ध्वनिविरोधिमतमतिप्राचीनमीमासकानामस्ति । ते च अभिधातिरिक्तं ध्वनिनामकं किमपि वस्तु न स्वीकुर्वन्ति । दीर्घदीर्घतररूपेण अभिधाव्यापारेणैव ध्वन्यार्थस्य बोधो भवतीति तेषामभिमतम् । यथा- योऽप्यन्युताभिधानवादी 'यत्परः शब्दः स शब्दार्थः' इति हृदये गृहीत्वा शरवदभिधाव्यापारमेव दीर्घदीर्घमिच्छति । ये त्वभिदधति सोऽयमिषोरिव दीर्घदीर्घतरो व्यापार इति । यत्परः शब्दः स शब्दार्थ (मम्मटः, सन् २००७, पृ. ५०) इति॥

३) ध्वनिविरोधीनां तृतीयं मतमस्ति यत्– यथा अजहत्स्वार्थलक्षणया 'रामोऽसौ भुवनेषु' 'रामोऽस्मि सर्वं सहे''र मेण प्रियजीवितेन तु कृतम्', इत्यादिस्थलेषु क्रमशः रामशब्दस्यार्थः खर दूषणनिहन्तृत्वम्, सकलदुःखभाजनत्वम्, निष्करुणत्वम् इत्याद्यर्थानां प्राप्तिर्भवति । तथैव सर्वत्र ध्वन्यार्थस्य बोधो लक्षणयैव भवति । अतो ध्वनेः नास्त्यावश्यकता । इति ।

४) चतुर्थं ध्वनिविरोधिमतमस्ति यत् - यथा लक्षितलक्षणया जगत्स्वार्थलक्षणया वा 'उपकृतं बहु तत्र' (काव्यप्र काशः, सन् २००७, पृ.३५) इत्यादिस्थलेषु उपकृतादिशब्दानां अपकृताद्यर्थस्य प्राप्तिर्भवति । तथैव अन्यत्रापि ध्वन्यार्थस्य लक्षार्थरूपतया लक्षणयैव ध्वन्यार्थस्य बोधः स्यात् । तदतिरिक्तध्वनेः स्वीकारो नोचितः । इति ।

५,६) पञ्चमषष्ठयोर्ध्वनिविरोधिमतयोराविष्कारकाः खलु शङ्कुक-महिमभट्ट-जयन्तभट्टादय आचार्याः सन्ति । ते स्वार्थानुमानपरार्थानुमानरूपे द्विविधानुमाने ध्वनेरन्तर्भावं स्वीकृत्य ध्वनेरनुमेयत्वं स्वीकुर्वन्ति । महिमभट्टेन अनुमाने एव सर्वध्वनीनामन्तर्भावं प्रदर्शयितुं व्यक्तिविवेकाख्यो ग्रन्थो विरचितः । तन्मतानुसारं यथा पर्वतादौ धूमादिसाधनद्वारा बह्न्यादिसाध्यानामनुमितिर्भवति, तथैव रसवस्त्वलङ्काररूपाणां त्रिविधव्यङ्ग्यथानामपि अनुमितिरेव भवति न तु ध्वनिरूपेणाभिव्यक्तिः । यत्र वाच्यानुमितोऽर्थः केनचित्सम्बन्धेनार्थान्तरं प्रकाशयति तत्र काव्यानुमितिर्भवति । न्यायसूत्रस्य व्याख्याकारो जयन्तभट्टोऽपि अनुमाने एव ध्वनेर्गतार्थत्वमनुमोदते । तथा शङ्कुकोऽपि अनुमाने एव ध्वनेरन्तर्भावमुररीकरोति ।

७) सप्तमं ध्वनिविरोधिमतं मीमांसकानामेवास्ति । ते अर्थापत्तिद्वारा ध्वनेर्बोधो भवतीति स्वीकुर्वन्ति ।

अर्थापत्तिश्च उपपाद्यज्ञानेनोपपादककल्पनम् । यथा पीनो देवदत्तो दिवा न भुङ्क्ते । अत्र रात्रिभोजनेन विना दिवा अभुञ्जानस्य पीनत्वमनुपपन्नमिति, तादृशपीनत्वमुपपाद्यम् । तथा च रात्रिभोजनस्याभावे तादृशपीनत्वस्यानुपपत्तिरिति रात्रिभोजनमुपपादकम् । अतः उपपाद्यज्ञानं करणम् । उपपादकज्ञानं फलम् । अर्थापत्तिश्च द्विधा भवति दृष्टार्थापत्तिः, श्रुतार्थापत्तिश्च । मीमांसकानां कथनस्य सारमस्ति यत् यथा पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र देवदत्तस्य रात्रिभोजनमर्थापत्तिप्रमाणबोध्यं भवति । तथैव 'निःशेषच्युतचन्दनम्' (मम्मटः, सन् २००७, पृ. १४) इत्यादौ अपि नायकान्तिकगमनरूपाद्यर्थः निःशेषच्युतचन्दनाद्यनुपपत्या अर्थापत्तिप्रमाणद्वारैव बोध्यो भवति । न तु ध्वन्यमानतया । इति ।

८) ये तन्त्रद्वारैव ध्वन्यमानार्थस्य बोधो भवतीति स्वीकुर्वन्ति तेषां ध्वनिविरोध्यष्टमं मतमस्ति । यथा 'श्वेतो धावति' अत्र तन्त्रन्यायेन श्वेतं वस्तु गच्छति इत्यर्थस्तथा कुक्कुर इतः गच्छति इत्यर्थश्च भाति । तथैव ध्वनिस्थलेऽपि तन्त्रन्यायेनैव वाच्यार्थस्य वाच्यार्थध्वन्यार्थयोः स्वीकार उचित इति । अनेकार्थानां बोधनेच्छया एकपदस्य सकृदुच्चारणमेव शास्त्रेषु तन्त्रमित्युक्तम् । अतः ध्वनेः पृथगङ्गीकारो नोचित इति ।

९) ये समासोक्त्याक्षेपानुक्तनिमित्तविशेषोक्तिपर्यायोक्तापह्नुत्यन्योक्तिभावव्यतिरेकाद्यलङ्कारेषु ध्वन्यार्थमन्तर्भावयन्ति, तेषां मतमेव ध्वनिविरोधि नवमं मतमस्ति । तेषु भामहः प्रतीयमानमर्थं समासोक्त्याक्षेपयोर्गम्यमानार्थं पर्यायोक्तौ तथा प्रतीयमानसाम्यार्थमपह्नुतौ अन्तर्भावयति । तथैव दण्डिनापि व्यङ्ग्यार्थस्य उदात्तालङ्कारे प्रतीयमानसादृश्यार्थस्य उपमालङ्कारे च अन्तर्भावो विहितः । अनया एवं रीत्या रुद्रट-उद्भटप्रभृतिभिः प्राचीनालङ्कारिकाचार्यैर्ध्वन्यमानार्थस्य तेषु तेष्वलङ्कारेषु अन्तर्भावोऽनुमतः । अत एतेषां मतं ध्वनिविरोधित्वेन ध्वनिवादिभिः स्वीकृतमिति ।

१०) दशमं ध्वनिविरोधिमतं भट्टलोल्लटादीनामस्ति ते रसादीनामुत्पद्यमानत्वमङ्गीकुर्वन्ति । यदुत्पद्यते तन्न ध्वन्यते । अतः रसादीनां ध्वन्यमानत्वं युक्त्या विरुध्यते । विभावानुभावव्यभिचारिभावाणां कार्यकारणभावसम्बन्धाद्यस्य रसस्योत्पत्तिर्भवति तस्य ध्वन्यमानत्वं कथं सङ्गच्छते ? इति ।

११) एकादशं ध्वनिविरोधिमतं रसभोगवादिनां भट्टनायकाद्याचार्याणामस्ति । तै रसोत्पत्तिरसानुमितिरसाभिव्यक्तिवादिनामाचार्याणां मतानि युक्त्या खण्डितानि । तथा अभिधावृत्या विभावादयो रत्यादिस्थायिभावाश्च साधारणीकृताः सन्तः भावकत्वव्यापारेण उपभोगयोग्या भवन्ति । भोजकत्वव्यापारेण च रसानां भोगो भवतीति अङ्गीकृतञ्च ।

१२) अपरे ध्वनिविरोधिनो ध्वनेर्व्यापारान्तरबाध्यत्वं स्वीकुर्वन्ति । वक्रोक्त्यादिव्यापारेणैव ध्वनिर्बोध्यो भवति चेत्पृथग्ध्वनेरुल्लेखो नोचितः । इति द्वादशं ध्वनिविरोधिमतम् ।

एतानि ध्वनिविरोधीनि द्वादशमतानि तत्र तत्र समुल्लिखितान्यपि आनन्दवर्धनेन स्वविरचितध्वन्यालोकप्रबन्धे त्रिषु एव अन्तर्भावितानि । आचार्येणाभिनवगुप्तेन च तदेव समर्थितमस्ति । आचार्यानन्दवर्धनाभिमतानि त्रीणि ध्वनिविरोधिमतानीत्थं प्रतिपादितानि –

क) अभाववादिमतम्

ख) भाक्त(लक्षणावृत्ति)वादिमतम्

ग) अनिर्वचनीयवादिमतम्

क) तत्र प्रथमं ध्वन्यभाववादिनां मतमस्ति तच्च त्रिविधं व्याख्यातमस्ति ।

१) तत्राद्यं काव्यस्य शब्दगतं सौन्दर्यं शब्दालङ्कारद्वारा स्फुरति, अर्थगतं सौन्दर्यमर्थालङ्कारद्वारा भाति तथा सङ्घटनागतं सौन्दर्यञ्च वैदर्भ्यादिरीतिद्वारा उपनागरिकादिवृत्तिद्वारा च प्रतीयते चेत् तदतिरिक्तं काव्यचारुत्वसम्पादकं न किमपि दृश्यते । अतः अप्रसिद्धत्वाद् ध्वनिनामकं किमपि वस्तु नास्ति ।

२) प्रसिद्धप्राचीनपरम्परायां ध्वनेश्चर्चा न दृश्यते । यदि च तत्प्रस्थानभिन्ननूतनप्रस्थानस्य आरम्भः स्वीक्रियते तर्हि तत्र काव्यत्वाभावात् सहृदयहृदयाह्लाद्यत्वाभावाच्च तन्नोपयुज्यते । कल्पनया ध्वनौ काव्यत्वं व्यपदिश्यत तथापि तद्विद्वज्जनमानसमोदकं न भवति इति नास्त्येव ध्वनिः ।

३) ध्वनिर्नाम अपूर्वः कश्चिन्न सम्भवत्येव । तस्य अन्येष्वेव चारुत्वहेतुषु अन्तर्भावो भवति । अतः ध्वनिर्नाम प्र वादमात्रम् । न च तस्य तत्त्वं कैश्चिदपि प्रकाशयितुं शक्यते । विषयेऽस्मिन् कैश्चित् पद्यं कृतम् यत् – यस्मिन्नस्ति न वस्तु किञ्चन मनः प्रह्लादिसालङ्कृति- र्व्युत्पन्नै रचितं च नैव वचनैर्वक्रोक्तिशून्यं च यत् । काव्यं तद्ध्वनिना समन्वितमिति प्रीत्या प्रशंसन् जडो । नो विद्मोऽभिदधाति किं सुमतिना पृष्टः स्वरूपं ध्वनेः( आनन्दवर्धनः, सन् २०१०, पृ.५) ॥ इति । अतः नास्ति ध्वनिः ।

ख) भाक्त(लक्षणावृत्ति)वादिमतम्

राजानकानन्दवर्धनेन ध्वनिविरोधिद्वितीयमतरूपेण भाक्तमतं पुरस्कृतम् । मुख्यार्थस्य भङ्गो भक्तिः, ततः आगतः भाक्तः लाक्षणिक इत्यर्थः । अर्थात् ध्वनेर्लक्षणावृत्तौ एव अन्तर्भावो भवति । लक्षणावृत्तेर्नामान्तरमेव ध्वनिः । अतः मीमांसकाभिमतमेतन्मतमपि ध्वनिविरोधित्वेनैव उपन्यस्तम् ।

ग) अनिर्वनचनीयवादिमतम्

मतमिदं तेषामस्ति ये ध्वनेस्तत्त्वमनिर्वचनीयं वर्णयन्ति । न शक्यते वर्णयितुं गिरा तदा, स्वयं तदन्तः करणेन गृह्यते इत्युक्त्यनुसारं ध्वनिः सहृदयहृदयसंवेद्यो भवति । अतः तस्य लक्षणादिकं किमपि न सम्भवति । अनया रीत्या आननदवर्धनेन त्रीणि मतानि ग्रन्थादौ प्रदर्शितानि । तानि च 'जगदुः, आहुः, ऊचुः' इति शब्दैः प्र कटितानि ।

एवं विधासु विप्रतिपत्तिषु सहृदयमनःप्रीतये आनन्दवर्धनेन ध्वनेः स्वरूपं प्रतिपादितं तथा एतेषां समेषां ध्वनिविरोधिमतानां च बलीयसीभिर्युक्तिभिः पुष्टतरैः प्रमाणैश्च खण्डनं विहितम् । ततः सर्वेषामलङ्कारिकानां पुर तो ध्वनितत्त्वं संस्थापितञ्च । ध्वनिमतं वस्तुतस्तु रसमतस्यैव विकशितं रूपमस्ति ।

काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा ।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः (आनन्दवर्धनः, सन् २०१०, पृ. २५) ॥

व्यङ्ग्यो रसादिरेव वस्तुतः काव्यस्यात्मा । वस्त्वलङ्कारध्वनी तु सर्वथा रसं प्रति पर्यवस्येते इति वाच्यादुत्कृष्टौ तौ इत्यभिप्रायेण ध्वनिः काव्यस्यात्मा इति सामान्येनोक्तम् ।

**४) उपसंहारः**

संस्कृतसाहित्ये प्रसिद्धः व्याकरणशास्त्रस्य स्फोटसिद्धान्तात्प्रादुर्भूतः काव्यशास्त्रस्य ध्वनिसिद्धान्तो विविधैराचार्यैः

परिपोषितः । आनन्दवर्धनाचार्यात् प्राग् ध्वनिविरोधे आचार्याणां धाष्टर्चं समधिगतम् । परं यदा राजानकानन्दवर्धनेन ध्वनिविरोधिनां मतानि युक्त्या चूर्णीकृतानि ततः ध्वनिविरोधे न केषामपि तादृशी साहसिकता दृश्यते । आनन्दवर्धनेन संस्थापितोऽभिनवगुप्तेन पोषितः ध्वनिसिद्धान्तः ध्वनिप्रस्थापनपरमाचार्येण मम्मटेन च अङ्गीकृतः । ध्वनिविरोधे संलग्नानां केषाञ्चिन्मतानां खण्डनं विधाय आचार्यमम्मटेन व्यञ्जनायाः व्यङ्गचरूपध्वनेश्च स्थापनं विहितम् । ततः काव्यजगति ध्वनेरखण्डं साम्राज्यमभूत् । काव्यस्य सूक्ष्मतमाङ्गरूपवर्णाद् बृहत्तरप्रबन्धं यावद् ध्वनेर्व्यापकता सिद्धा । उपसर्ग-निपात-प्रकृति-प्रत्यय-पद-वाक्य-महावाक्यादिनिखिलमपि वाङ्मयं ध्वनिनाधिकृतम् । अलङ्काराणां महत्त्वमपि ध्वन्यार्थस्योत्कर्षे एव पर्यवसितम् । वैदर्भ्यादिरीतीनाम्, उपनागरिकादिवृत्तीनां च पर्यवसानं ध्वनावेव सिद्धम् । काव्यजगति ध्वनिः अङ्गीत्वेन महासागरस्थानीयत्वेन च अवस्थितः । रीतिवृत्यलङ्कारादयश्चाङ्गरूपेण नदीरूपेण च स्थिरीभूताः । अतः रसवस्त्वलङ्काररूपः ध्वनिः काव्यस्य आत्मा अस्ति । यथा आत्मनोऽभावे शरीरस्य न किमपि महत्त्वं सिद्धचति तथैव ध्वनेरभावे काव्यस्यापि न किमपि मूल्यमनुमातुं शक्यत इति ।

**सन्दर्भग्रन्थाः–**

आनन्दवर्धनः. (सन् २०१०).ध्वन्यालोकः. वाराणसीः : ज्ञानमण्डल लिमिटेड ।
आनन्दवर्धनः.(सन् १९४०).ध्वन्यालोकः(सलोचनः).वाराणसीः चौखम्बा संस्कृत संस्थान ।
धनञ्जयः.(१९९५).दशरूपकम्. वाराणसीः चौखम्बा विद्याभवन
भर्तृहरिः.(सन् १९९०).वाक्यपदीयम्. वाराणसीः चौखम्बा सुरभारती ।
मम्मटः. (सन् २००७).काव्यप्रकाशः(व्या. आचार्य विश्वेश्वरः). वाराणसीः ज्ञानमण्डल प्रेस ।
वाल्मीकिः. (सन् १९९०).वाल्मीकीयरामायणम्. मद्रासः मइलापुर ।
विश्वनाथः.(२०६७).साहित्यदर्पणम्. वाराणसीः चौखम्बा विद्याभवन ।
वेदव्यासः. (२०७५). श्रीमद्भगवद्गीता.गोरखपुरः गीताप्रेस ।
वेदव्यासः. (सन् २०१०). महाभारतम्. गोरखपुरः गीताप्रेस ।